# चतुर्थः घट्टः



## *सञ्चारमाध्यमानि विज्ञापनानि च*

### *शिक्षकाणां कृते*

अद्यत्वे सञ्चार-माध्यमानां विज्ञापनानां च प्रतिबिम्बः युवकानां जीवने सम्पूर्णतया व्याप्तः अस्ति, ते एतां सत्यतां गभीरतया अवगमनस्य प्रयासं कृतवन्तः स्युः अथवा न कृतवन्तः स्युः। अयं घट्टः अस्यां सत्यतायां ध्यानाकर्षणस्य केषाञ्चित् मार्गाणाम् आविष्करणं करिष्यति।

"सञ्चार-माध्यमानां विषये अवगमनम्" नामके अध्याये मुख्यरूपेण सञ्चार-माध्यमानां प्रौद्योगिक्या सह तथा च महद्भिः व्यवसायिक-प्रतिष्ठानैः सह सम्बन्धान् बोधयितुं बलाघातः कृतः। अयम् अध्यायः दर्शयति यत् कथं कस्यचित् विषयस्य महत्त्वस्य विषये अथवा तस्य महत्त्वहीनतां स्वीकृत्य वयं यासाम् अवधारणानां निर्माणं कुर्मः ताः सञ्चारमाध्यमैः प्रभाविताः भवन्ति एतद् एव वास्तविकतायां तेषां मुख्यध्येयं भवति। विज्ञापनानाम् अवगमनं नामके अध्याये वयम् एतस्य तथ्यस्य विश्लेषणं कुर्मः यत् विज्ञापनस्य रणनीतयः ग्राहकान् कथं प्रभावयन्ति तथा च सह एव इदम् अपि दर्शयन्ति यत् विज्ञापनानि केन प्रकारेण निर्मीयन्ते। कस्यापि विज्ञापनस्य आधारः भवति कस्यचित् उत्पादस्य विशिष्टतायाः विकसनम् तथा च तस्य ब्राण्ड इत्यस्य महत्त्वस्य स्थापनम्। अयम् अध्यायः तेषाम् उपायानाम् अन्वेषणे परिचयने च अपि साहाय्यं करोति ये ग्राहकाणां मनसि लोभस्य उत्पादने सफलतां लभन्ते तथा च बोधयति यत् अयं पाठः कथम् एते उपायाः ग्राहकाणाम् आत्मव्यक्तित्वेन सम्बद्धाः क्रियन्ते।

षष्ठाध्यायः सप्तमाध्यायः च सञ्चारमाध्यमानां विज्ञापनानां च व्यापकप्रभावेभ्यः अस्माकं परिचयं कारयतः तथा च अस्माकं जीवनेन सह एतान् विषयान् योजनस्य प्रयासं कुर्वन्ति। सञ्चार-माध्यम इति अध्यायस्य अन्ते अस्माकम् इयम् अपेक्षा भविष्यति यत् विद्यार्थिनः इदं ज्ञातुम् आरभन्तां यत् विशालानां व्यवसायिक-प्रतिष्ठानानां सञ्चारमाध्यमेषु प्रकाशित-समाचारान् निश्चेतुं का भूमिका योगदानं वा भवति के समाचाराः चीयन्ते तथा च प्रत्यक्षरूपेण अथव अप्रत्यक्षरूपेण तेषां माध्यमेन के सन्देशाः दीयन्ते। वयं द्वयोः काल्पनिक-समाचारयोः माध्यमेन दर्शयिष्यामः यत् कस्यापि घटनायाः अथवा विषयस्य समाचारस्य बहुधा केवलं एकं स्वरूपं न भवति। वयम् अपेक्षामहे यत् विद्यार्थिनः एतत् तथ्यम् अवगच्छन्तःते तादृशीनां क्षमतानां विकासं करिष्यन्ति याभिः ते समाचारस्य दूरदर्शनस्य च कस्यापि सूचनायाः विश्लेषणं कर्तुं योग्याः भविष्यन्ति तथा च ते इदं ज्ञातुं शक्ष्यन्ति यत् समाचारे प्रदत्तसूचना कीदृशी अस्ति दीयते अपि वा न दीयते तथा च तस्य समाचारस्य विषये कीदृशः दृष्टिकोणः अथवा तर्कः भवितुं शक्नोति।

यस्मिन् अध्याये विज्ञापनस्य विषये चर्चा कृता अस्ति तस्मिन् अध्याये विज्ञापनद्वयं निर्माय प्रस्तुतं ये क्रमेण तेषां प्रकृष्टप्रविधीनां परिचयं यच्छन्ति यैः ग्राहकाः लोभयुक्ताः क्रियन्ते। एतेषु उदाहरणेषु ब्राण्ड तथा च ब्राण्ड-मूल्यम् इति इति द्वे केन्द्रियशब्दावल्यौ अवगमने बलाघातः प्रदत्तः अस्ति या विज्ञापनस्य मुख्याधारभूता भवति। एतेषां विषयाणां अवगमनं दृढीकर्तुं वास्तविक-विज्ञापनानाम् उदाहरणानि नेतव्यानि तथा च तेभ्यः तादृशानाम् एव प्रश्नेभ्यः साहाय्यं स्वीकृत्य अन्वेषणं करणीयं यथा अध्याये प्रदत्तानि सन्ति।

अन्ते द्वौ एव अध्यायौ स्वस्य विषयवस्तुनः लोकतन्त्रस्य विचारेण सह सम्बन्धं स्थापयन्ति। एतौ अध्यायौ स्थानीय-सञ्चार-माध्यमानां तथा च सामाजिक-विज्ञापनानां विकल्पानां सन्दर्भे एतौ वर्णयतः यत् मुख्यधारायां तेषां जनानाम् एव तथ्यानि स्थानं लभन्ते ये सामाजिक-संसाधनानां वित्तीय-संसाधनानां च धनिनः सन्ति। एतस्मिन् पक्षे बलाघातं कर्तुं कक्षायां स्थानीय-सञ्चार-माध्यमानां समाचाराणाम् उदाहरणेषु चर्चा कर्तुं शक्यते तथा च बालैः सह एतस्मिन् प्रश्ने अपि चर्चा कृता अस्ति यत् विज्ञापनानां प्रभावात् स्थानीये स्तरे निर्मितानि विक्रयणशीलानि रुचिकराणि च वस्तूनि अधिकृत्य कानि कानि परिवर्तनानि आगच्छन्ति।

# अध्यायः - 6




## *सञ्चार-माध्यमानां विषये अवगमनम्*

दूरदर्शने भवतां रुचिकरः कार्यक्रमः कः वर्तते ? आकाशवाण्यां भवद्भ्यः किं रोचते ? प्रायः भवन्तः कीदृशानि समाचारपत्राणि अथवा कीदृशाः पत्रिकाः पठन्ति ? किं भवन्तः अन्तर्जाले अन्वेषणं (सर्फिंग इति) कुर्वन्ति ? भवन्तः तस्मिन् नितराम् उपयोगिनं किम् अनुभवन्ति ? किं भवन्तः तं कञ्चित् शब्दं जानन्ति यः प्रायः सामूहिकरूपेण आकाशवाण्याः कृते दूरदर्शनस्य कृते अन्तर्जालस्य तथा च सञ्चारस्य अन्येषां साधनानां च कृते प्रयुज्यते ? अयं शब्दः वर्तते मीडिया इति। अस्मिन् पाठे भवन्तः मीडिया अर्थात् सञ्चारमाध्यमानां विषये विस्तरेण पठिष्यन्ति। भवन्तः ज्ञास्यन्ति यत् अयं कथं कार्यं करोति तथा च कथम् अस्माकं दैनन्दिनं जीवनं प्रभावयति। किं भवन्तः किञ्चित् एतादृशं वस्तु स्मर्तुं शक्नुवन्ति यत् भवद्भिः अस्मिन् सप्ताहे सञ्चारमाध्यमैः शिक्षितं स्यात् ?

स्थानीय-मेलापकस्य आपणाद् आरभ्य दूरदर्शनस्य कार्यक्रमं यावत् यत्किमपि भवन्तः पश्यन्ति एते सर्वे सञ्चारमाध्यमम् अर्थात् मीडिया इति वक्तुं शक्यते। मीडिया इति शब्दः आङ्ग्लभाषायाः मीडियम् इति शब्दस्य बहुवचनम् अस्ति तथा च एतस्य तात्पर्यं तेभ्यः विभिन्नेभ्यः विधिभ्यः वर्तते येषां माध्यमेन वयं समाजे परस्परं विचाराणाम् आदानं प्रदानं च कुर्मः। मीडियम् इत्यस्य अर्थः अस्ति माध्यमम् इति। यतोहि मीडिया इत्यस्य सन्दर्भः सञ्चारमाध्यमेभ्यः

सम्प्रतिः पृष्ठे प्रदत्ते चित्र-समूहे सञ्चार-माध्यमानां षट् पृथक् पृथक् प्रकारान् चिन्वन्तु।

अस्ति अतः प्रत्येकं वस्तु यथा दूरवाण्यां सम्भाषणाद् आरभ्य सायङ्कालीनानां समाचाराणां श्रवणं यावत् यत्किमपि अस्ति तद् मीडिया इति वक्तुं शक्यते । दूरदर्शनम् आकाशवाणी तथा च समाचारपत्रं सञ्चारमाध्यमानाम् एतादृशानि रूपाणि सन्ति येषां प्राप्तिः लक्षाधिकान् जनान् यावत् अस्ति देशस्य विदेशस्य च जनसमूहं यावत् अस्ति अतः ते जन-सञ्चार-माध्यमम् अथवा मास-मीडिया इति उच्यते ।

## *सञ्चारमाध्यमं प्रविधिः च*

भवतां कृते सम्भवतः सञ्चारसाधनानि विना स्वजीवनस्य कल्पनम् अपि कठिनं स्यात् । परन्तु केवलं दूरदर्शनस्य अन्तर्जालस्य च व्यापकप्रयोगः अद्यतने काले एव प्रारब्धः। एतेषां व्यवहारपथे आगमनस्य विंशतिवर्षाणि अपि न जातानि सन्ति । जनसञ्चारसाधनानां कृते प्रयुक्तप्रौद्योगिकी नैरन्तर्येण परिवर्तते ।



*कस्यचित् चित्रकारस्य दृष्टौ बाइबल इत्यस्य पूर्वतनस्य पृष्ठस्य मुद्रणं कुर्वन् गुटेनबर्गः ।*

समाचारपत्रं दूरदर्शनम् आकाशवाणी च लक्षशः जनान् यावत् प्राप्तुं शक्नुवन्ति यतोहि एतेषु काचित् विशिष्टप्रकारकस्य कौशलस्य उपयोगः क्रियते । वयं समाचारपत्राणां पत्रिकाणां च मुद्रितसाधनस्य रूपेण तथा च दूरदर्शनस्य आकाशवाण्याः च विद्युत्-साधनस्य रूपेण चर्चां कुर्मः । भवतां विचारेण समाचारपत्राणि, मुद्रितसाधनानि किमर्थम् उच्यन्ते ? अग्रे पठित्वा भवन्तः ज्ञास्यन्ति यत् एतानि नामानि सञ्चारमाध्यमैः प्रयोगार्थम् आनीतकौशलेन सम्बन्धितानि सन्ति । अधः प्रदत्तचित्रैः भवन्तः ज्ञास्यन्ति यत् गतवर्षेषु जनसञ्चारमाध्यमस्य प्रयोगे आनीतकौशलं केन प्रकारेण परिवर्तितम् अस्ति तथा च अद्यापि परिवर्तते ।

*स्वपरिवारस्य ज्येष्ठान् जनान् पृच्छन्तु यत् यदा दूरदर्शनं नासीत् तदा ते आकाशवाण्यां किं शृण्वन्ति स्म ? तान् पृच्छन्तु यत् भवतां क्षेत्रे प्राथम्येन दूरदर्शनं कदा आगतम् आसीत् ? केबल-दूरदर्शनं कदा आरब्धम् ?*

प्रौद्योगिक्यः यन्त्राणां च परिवर्तनं कृत्वा एतेषाम् अत्याधुनिकी-करणेन सञ्चारमाध्यमानि अधिकजनैः प्राप्यन्ते । एतेन ध्वनौ चित्राणां च गुणवत्तायां परिष्कारः भवति परन्तु प्रौद्योगिकी इतोऽपि अधिकं किञ्चित् करोति । इदम् अस्माकं जीवनस्य विषये चिन्तनस्य शैलीं परिवर्तयति । उदाहरणार्थम् अद्य अस्माकं कृते दूरदर्शनं विना जीवनस्य कल्पनम् अपि कठिनम् अस्ति । दूरदर्शनस्य कारणात् वयम् आत्मानं विश्वसमाजस्य सदस्यरूपेण अनुभवामः । दूरदर्शने प्रदर्शितानि चित्राणि सेटेलाइट इत्यस्य तथा च केबल इत्यस्य विस्तृतस्य जालस्य माध्यमेन अत्यन्तं सुदूरक्षेत्राणि यावत् प्राप्यन्ते । एतेषां कारणात् वयं संसारस्य अन्यभागानां समाचारान् मनोरञ्जक-कार्यक्रमान् च द्रष्टुं पारयामः । भवन्तः दूरदर्शने यानि कार्टून् इत्येतानि पश्यन्ति ते अधिकांशतः जापानदेशस्य अथवा सङ्युक्त-राज्यामेरिकायाः भवन्ति ।

*भवतां प्रतिवेशे कति जनाः अन्तर्जालस्य प्रयोगं कुर्वन्ति ?*

*एतादृशानां त्रयाणां वस्तूनां सूचीं कुर्वन्तु या संसारस्य कैश्चित् अन्यैः जनैः सम्बद्धा अस्ति तथा च येषां विषये भवन्तः दूरदर्शनं दृष्ट्वा ज्ञातवन्तः?*



***1940 तमे दशके विद्युत्-मुद्रणयन्त्रे आगते सति पत्रकारितायाः क्षेत्रे किञ्चित् महत् परिवर्तनं आगतम्।***



*(इदं यन्त्रं टेलीवाइजर इति दूरदर्शनस्य प्रारम्भिकं रूपम् आसीत् । स्वस्य एतस्य आविष्कारस्य पुरतः उपविष्टः अस्ति –जॉन-एल-बैर्डमहोदयः। एतेन यन्त्रेण सः रायल-प्रशिक्षणकेन्द्रस्य समक्षं स्वस्य आविष्कारस्य प्रदर्शनं कृतवान्।*

*स्वस्य प्रियस्य दूरदर्शन-कार्यक्रमस्य काले विज्ञापितानां त्रयाणां वस्तूनां सूचीं निर्मान्तु।*

*किञ्चित् समाचारपत्रं गृह्णन्तु तस्मिन् प्रदत्तानां विज्ञापनानां सङ्ख्यां गणयन्तु।केचन जनाः कथयन्ति यत् समाचारपत्रेषु प्रभूतानि विज्ञापनानि भवन्ति? किं भवन्तः चिन्तयन्ति यत् इदं तथ्यं समीचीनम् अस्ति? यदि आम् तर्हि किमर्थम्?*

अधुना वयं चेन्नईनगरे अथवा जम्मूप्रान्ते उपविश्य अमेरिकायां फ्लोरिडायाः समुद्रस्य झञ्झावातस्य चित्राणि द्रष्टुं शक्नुवन्ति । दूरदर्शनेन संसारः बहुसमीपम् आनीतः अस्ति ।

### ***सञ्चारसाधनं धनम् च***

जनसञ्चारसाधने प्रयुक्तानि विभिन्नानि कौशलानि अत्यन्तं व्ययपूर्णानि सन्ति। किञ्चित् दूरदर्शन-स्टूडियो इति विषये चिन्तयन्तु यत्र समाचारवाचकः उपविशति। एतस्मिन् प्रकाशयन्त्राणि छाया-चित्रयन्त्राणि ध्वनि-सङ्ग्राहकानि यन्त्राणि सम्प्रेषणार्थं सेटेलाइट इत्यादीनि सन्ति । एतेषां सर्वेषां मूल्यम् अत्यधिकम् अस्ति ।

समाचरकक्षे केवलं समाचारवाचकाय एव वेतनं न दीयते अपरञ्च बहवः जनाः सन्ति ये प्रसारणे सहायकाः भवन्ति । एतस्मिन् ते जनाः सम्मिलिताः भवन्ति ये छाया-चित्रयन्त्रस्य प्रकाशस्य च व्यवस्थां कुर्वन्ति । यथा भवद्भिः पठितम् अस्ति जनसंचारमाध्यमानि नैरन्तर्येण परिवर्तनशीलानि भवन्ति । अतः नवीनतम-प्रौद्योगिकीः उपलब्धुम् अपि बहुधनस्य व्ययः भवति । एतेषां व्ययानां कारणतः जनसंचारमाध्यमानां कृते स्वकार्यं कर्तुं प्रभूतस्य धनस्य आवश्यकता भवति । परिणामतः अधिकांश-दूरदर्शन-प्रणालिकाः समाचारपत्राणि च कस्यचित् महतः व्यापारिक-प्रतिष्ठानस्य भागभूताः भवन्ति ।

जनसञ्चार-माध्यमानि नैरन्तर्येण धनार्जनार्थं विभिन्नानाम् उपायानां विषये चिन्तयन्ति । एकः उपायः यस्य माध्यमेन जनसञ्चारमाध्यमानि धनार्जनं कुर्वन्ति तदस्ति विभिन्नानां वस्तूनां विज्ञापनम् । यथा - कारयानानां वस्त्राणां चलदूर-भाष-यन्त्रादीनां च । भवद्भिः अवधानं दत्तं स्यात् यत् स्वप्रियतमं दूरदर्शन-कार्यक्रमं पश्यन्तः भवन्तः एतादृशानां अनेकेषां वस्तूनां विज्ञापनानि पठितुं बाध्याः भवन्ति । दूरदर्शने क्रिकेटक्रीडां पश्यन्तः अपि प्रत्येकम् ओवर इति पश्चात् पुनः पुनः तानि एव विज्ञापनानि दर्श्यन्ते । अनेन प्रकारेण प्रायः पुनः पुनः भवन्तः तानि विज्ञापनानि तानि चित्राणि एव पश्यन्ति । यथा भवन्तः अग्रिमेषु अध्यायेषु पठिष्यन्ति विज्ञापनानां पौनःपुन्येन आवृत्तिः अनया आशया क्रियते यत् भवन्तः बहिः गत्वा विज्ञापितं वस्तु क्रेष्यन्ति ।



***एकस्यां समाचार-प्रणालिकायां दशनिमेषार्थं विज्ञापनस्य मूल्यं तस्य लोकप्रियतायाः आधारेण ५०० रूप्यकेभ्यः 8000 रूप्यकाणि इति यावत् भवति ।***

## *सञ्चारमाध्यमं लोकतन्त्रं च*

लोकतन्त्रे देशस्य संसारस्य च विषये समाचारदानस्य तथा च तत्र जायमानासु घटनासु चर्चायाः कृते सञ्चारमाध्यमानां भूमिका अतीव महत्त्वपूर्णा अस्ति । उदाहरणार्थं सञ्चारमाध्यमैः नागरिकाः ज्ञातुं शक्नुवन्ति यत् सर्वकारः केन प्रकारेण कार्यं करोति । यदि जनाः इच्छेयुः तर्हि एतेषां समाचारपत्राणाम् आधारेण विरुद्धं क्रियान्वयनम् अपि कर्तुं शक्नुवन्ति । एतत् कार्यं ते सम्बन्धिताय मन्त्रिणे पत्रं लिखित्वा सार्वजनिकं विरोध-प्रदर्शनम् आयोज्य हस्ताक्षर-अभियानादिकं चालयित्वा च सर्वकारं पुनः तस्य कार्यक्रमस्य विषये विचारं कर्तुम् आग्रहं कुर्वन्ति स्म ।

सूचनादानस्य सम्बन्धे सञ्चारमाध्यमस्य महत्त्वपूर्णं दायित्वं दृष्ट्वा इदम् आवश्यकम् अस्ति यत् ज्ञानं सन्तुलितं स्यात् । आगच्छन्तु अग्रिमे पृष्ठे प्रदत्तस्य कस्यचित् समाचारस्य द्वयोः विभिन्नरूपयोः विषये पठित्वा जानीमः यत् संतुलित-सञ्चार-माध्यमस्य कः अभिप्रायः अस्ति ?

*न्यूज-आफ-इण्डिया इत्यस्य समाख्या*

## *प्रदूषणकारकेषु उद्योगेषु वज्रपातः। विरोधिभिः राजमार्गनिरोधः, यातायातः निरुद्धः*

*राधिका-मलिकः । आई.एन.एन*

*उद्योग-स्वामिनां श्रमिकाणां च विरोधेन अद्य नगरस्य गतिविधयः निरुद्धाः । राजमार्गेषु वाहनानां विशाल-सम्मर्दः वर्तते तस्मात् कारणात् जनाः यथाकालं स्व-कार्यालयं न प्राप्तवन्तः । उद्योगस्वामिनः तथा च श्रमिकाः सर्वकारस्य प्रदूषण-कारकाणां घट्टानां पिधानं स्यात् इति निर्णयस्य विरोधं कुर्वन्ति । यद्यपि सर्वकारेण एषः निर्णयः शीघ्रतायां स्वीकृतः परन्तु विरोधिनः चिरकालाद् जानन्ति स्म यत् तेषां घट्टाः अधिनियमानुसारं न सन्ति । एतेषां घट्टानां पिधानात् नगरे प्रदूषणस्य स्तरः बहुन्यूनः भविष्यति । नगरस्य गण्यमान्यः नागरिकः श्रीजैनः उक्तवान् अस्माकं नगरं भारतस्य नूतनस्य व्यवसायिक-केन्द्रस्य रूपेण स्थापितः भवति । एतेन सह इदम् अपि आवश्यकम् अस्ति यत् नगरं स्वच्छं हरितिमायुक्तं च तिष्ठेत् । प्रदूषणकारकाः उद्योगाः अपसारिताः भवेयुः। विरोधप्रदर्शनस्य स्थाने उद्योगस्वामिनः श्रमिकाः च यदि पुनस्स्थापनस्य प्रस्तावं स्वीकुर्युः तदा एतत् सम्यक् स्यात् ।*

## इण्डियाडेली इत्यस्य अनुसारं समाख्या

## उद्योगेषु पिहितेषु सत्सु महा-अशान्तिः

**डेली-न्यूज-सर्विस**

नगरस्य आवासीय-क्षेत्रेषु लक्षम् उद्योगाः पिहिताः भवन्ति तर्हि काचित् गभीरायाः समस्यायाः रूपं धर्तुं शक्नुवन्ति । सोमवासरे सहस्रम् उद्योगस्वामिनः श्रमिकाः च उद्योग-पिधानानां कठोरं विरोधं प्रदर्शयितुं राजमार्गान् आगतवन्तः । ते उक्तवन्तः यत् एतस्मात् तेषां वृत्तिः नष्टा भविष्यति जीवननिर्वहणं न भविष्यति । तेषां कथनम् आसीत् यत् दोषः नगरनिगमस्य अस्ति यतोहि सः आवासीयक्षेत्रेषु नैरन्तर्येण नूतनान् उद्योगान् संस्थापयितुं प्रमाणपत्रम् अददात् । ते एतद् अपि उक्तवन्तः यत् तेषां पुनस्स्थापनाय पर्याप्ताः प्रयत्नाः न कृताः। उद्योगस्वामिनः श्रमिकाः च उद्योगपिधान-सम्बन्धे कृते विरोधे नगरे एकस्य दिनस्य 'पिधानं' प्रस्तावितवन्तः । कस्यचित् उद्योगस्य स्वामिना श्रीशर्मणा उक्तम् यत् सर्वकारः कथयति यत् सः अस्माकं पुनस्स्थापनाय बहूनि कार्याणि कृतवान् परन्तु यादृशानि क्षेत्राणि सः अस्माकं कृते यच्छति तत्र कस्य अपि प्रकारस्य सुविधाः न सन्ति तथा च विगतेषु पञ्च-वर्षेषु तत्र कश्चित् अपि विकासकार्यं न जातम् अस्ति ।

*किं द्वयोः समाचारपत्रयोः प्रदत्तम् उपर्युक्तं विवरणं समानम् अस्ति ? भवतां विचारेण एतस्मिन् काः काः समानताः सन्ति तथा च के के भेदाः सन्ति ।*

*यदि भवन्तः न्यूज-आफ-इण्डिया इत्यस्मिन् प्रदत्तं विवरणं पठिष्यन्ति तर्हि एतस्याः समस्यायाः विषये किं चिन्तयिष्यन्ति ?*

वास्तविकतायां तु इदम् अस्ति यत् यदि भवन्तः एतेषु केवलं एकं समाचारपत्रं पठिष्यन्ति तर्हि तु विषयस्य एकम् एव पक्षं ज्ञास्यन्ति । यदि भवन्तः न्यून-आफ-इण्डिया इति अपठिष्यन् तर्हि विरोधिनां वार्ताः वृथाप्रलापः इति भवन्तः अन्वभविष्यन् । तेषां यातायात-व्यवस्थायां बाधाजननं तथा च स्व-उद्योगेभ्यः नगरे प्रदूषणस्य विस्तारकरणम् इत्यनेन भवतां मनसि तेषां विषये विपरीत-अवधारणायाः अङ्कनं कृतं स्यात् । अपरस्मिन् पक्षे यदि भवद्भिः इण्डिया-डेली इति समाचारपत्रं पठितं स्यात् तदा भवन्तः अज्ञास्यन् यत् उद्योगेषु पिहितेषु सत्सु बहवः जनाः स्ववृत्तेः साधनतः वञ्चिताः भविष्यन्ति यतोहि पुनर्वासस्य प्रयासाः अपर्याप्ताः सन्ति । एतयोः द्वयोः विवरणयोः किञ्चिद् अपि सन्तुलितं नास्ति । सन्तुलिता समाख्या सा भवति यस्यां कस्मिन् अपि विषये प्रत्येकं दृष्टिकोणेन

चर्चा क्रियते पुनरपि पाठकाः स्वयं तस्मिन् विषये विचाराः कर्तुं स्वतन्त्राः भवन्ति।

सन्तुलितायाः समाख्यायाः लेखनं सञ्चारमाध्यमानां स्वतन्त्रतायाः आश्रितं भवति । स्वतन्त्र-सञ्चार-माध्यमैः तात्पर्यम् इदम् अस्ति यत् तैः प्रदत्तसमाचारान् कश्चन अपि न नियन्त्रयेत न च प्रभावयेत् । समाचारस्य विवरणदाने कश्चित् अपि तान् न निर्दिशेत् यत् तेषु किं सम्मिलितं स्यात् अपि च किं न भवेत्। लोकतन्त्रे स्वतन्त्र-सञ्चारमाध्यमानां भवनम् अत्यन्तं महत्त्वपूर्णम् अस्ति। यथा भवद्भिः उपरि पठितम्।

सञ्चारमाध्यमैः प्रदत्तायाः सूचनायाः आधारेण एव वयं नागरिकाणां रूपेण क्रियान्वयनं कुर्वन्ति अतः इदम् आवश्यकम् अस्ति यत् सूचना विश्वसनीया तटस्था च स्यात्।

*किं भवन्तः इत्थं चिन्तयन्ति यत् कस्यचित् विषयस्य उभयोः पक्षयोः ज्ञानं महत्त्वपूर्णम् अस्ति ? किमर्थम् ?*

*चिन्तयन्तु, यत् भवन्तः कस्यचित् समाचारपत्रस्य पत्रकाराः सन्ति अधुना भवन्तः उपर्युक्तयोः द्वयोः विवरणयोः एकां सन्तुलितां समाख्यां सज्जीकुर्वन्तु ।*

### *दूरदर्शनम् अस्माभिः सह किं करोति तथा च वयं दूरदर्शनेन सह किं कर्तुं शक्नुमः?*

***बहुषु गृहेषु अधिकांशसमये दूरदर्शनम् एव चलति । अस्माकं परितः स्थितस्य संसारस्य विषये अस्माकं बहवः विचाराः यत् किमपि वयं दूरदर्शने पश्यामः तेन एव निर्मीयन्ते । एतत् संसारं द्रष्टुं किञ्चित् वातायनम् इव वर्तते। भवतां विचारेण एतत् अस्मान् कथं प्रभावयति ? दूरदर्शने अनेकविधाः कार्यक्रमाः सन्ति, यथा- 'श्वस्रू अपि क्वचित् वधू आसीत्' सदृशाः पारिवारिकधारावाहिकाः, क्रीडाकार्यक्रमाः यथा - कोटिपतिः कः भविष्यति, वास्तविकजीवनं दर्शयितुं यथा यथा बिग-बॉस इति, समाचारः, क्रीडाः, कार्टून इत्यादयः। प्रत्येकं कार्यक्रमस्य***



***आदौ मध्ये अन्ते च विज्ञापनानि भवन्ति यतोहि दूरदर्शनस्य कालः महार्घः भवति । अतः केवलं ते एव कार्यक्रमाः प्रस्तूयन्ते ये अधिकाधिकान् दर्शकान् आकर्षेयुः। भवतां विचारेण एतादृशाः के के कार्यक्रमाः भवितुं शक्नुवन्ति ? तेषां तथ्यानां विषये चिन्तयन्तु ये दर्श्यन्ते अथवा ये न दर्श्यन्ते। अस्मभ्यं धनाढ्यानां विषये अधिकं दर्श्यते अथवा निर्धनानां विषये?***

तथ्यं तु इदम् अस्ति यत् सञ्चारमाध्यमानि स्वतन्त्राणि न सन्ति । एतस्य मुख्यतः कारणद्वयम् अस्ति। प्रथमं कारणम् अस्ति सर्वकारस्य तेषु नियन्त्रणम्। यदा सर्वकारः समाचारपत्रस्य कञ्चित् अंशं, चलचित्रस्य किञ्चित् दृश्यम् अथवा गीतस्य काञ्चित् अभिव्यक्तिं जनसमुदायं यावत् प्राप्तेः पूर्वं प्रतिबन्धितं करोति तदा एतत् सेंसरशिप इति उच्यते। भारतस्य इतिहासे एतादृशः कालः अपि आगतः अस्ति यदा सर्वकारः सञ्चार-माध्यमानाम् उपरि सेंसर इति स्थापितवान् । एतस्मिन् विपरीतः कालः -१९७५-७७ इति यावत् अर्थात् इति अवधेः आपातकालः आसीत्।

सर्वकारः यद्यपि चलचित्राणाम् उपरि तु नैरन्तर्येण निरीक्षणदलं स्थापयति परन्तु सः सञ्चारमाध्यमैः दर्शितेषु समाचारेषु सर्वथा एतादृशं न करोति। सर्वकारेण निरीक्षणसमितौ असत्याम् अपि अद्यत्वे अधिकांश समाचारपत्राणि सन्तुलितं विवरणं दातुम् असफलाः भवन्ति । एतस्य कारणानि बहुजटिलानि सन्ति । सञ्चारमाध्यमानां विषये शोधकर्तृणां जनानां कथनम् अस्ति यत् इत्थम् एतदर्थम् अस्ति यतोहि सञ्चारमाध्यमेषु व्यापारिक-प्रतिष्ठानानां नियन्त्रणम् अस्ति। कदाचित् कस्यचित् विवरणस्य एकस्मिन् पक्षे एव ध्यानाकर्षणम् एतेषां हिताय भवति। सञ्चार-माध्यमानां कृते निरन्तरं धनस्य आवश्यकता भवति तस्य कृते विज्ञापनेषु आश्रयणं भवति एतस्मात् कारणात् तेषां जनानां विरोधे प्रकाशनं कठिनं भवति ये विज्ञापनानि यच्छन्ति । अतः व्यापारेण गहनसम्बद्धतायाः कारणात् अधुना सञ्चार-माध्यमानि स्वतन्त्राणि इति न वक्तुं शक्यते।




एतदतिरिच्य सञ्चारमाध्यमानि कस्यचित् विषयस्य विशिष्टे पक्षे एतदर्थम् अपि अवधानं केन्द्रितं कुर्वन्ति यतोहि ते विश्वसन्ति यत् एतस्मात् विवरणं रुचिकरं भविष्यति। अनेन एव प्रकारेण यदि ते कस्मिंश्चित् विषये जनसमर्थनं वर्धितुम् इच्छन्ति तदा अपि विषयस्य एकस्मिन् पक्षे एव ध्यानं केन्द्रितं कुर्वन्ति।

## *स्वरूपस्य निर्धारणम्*

कासु घटनासु ध्यानं केन्द्रितं स्यात् एतेषु अपि सञ्चार-माध्यमानां महत्त्वपूर्णं स्थानम् अस्ति तथा च एतस्य एव आधारेण ते निश्चितं कुर्वन्ति यत् किं समाचारे देयानि सन्ति। उदाहरणार्थं भवतां विद्यालयस्य वार्षिकोत्सवस्य समाचारः प्रायः समाचारे देयं न भविष्यति परन्तु यदि कश्चित् सुप्रसिद्धः अभिनेता तस्मिन् कार्यक्रमे मुख्य-अतिथिरूपेण आमन्त्रितः भवेत् तर्हि सञ्चारमाध्यमानि एतां सूचनां समाचारे सम्मिलितं कर्तुं शक्नुवन्ति केषुचित् विशिष्टेषु विषयेषु अवधानं केन्द्रितं कृत्वा

सञ्चारमाध्यमम् अस्माकं विचारान् भावनाः कार्याणि च प्रभावयति तथा च अस्माकम् अवधानं, तान् विषयान् प्रति आकर्षयति। अस्माकं जीवने महत्त्वपूर्ण-प्रभाव-करणात् अपि च अस्माकं विचाराणां निर्माणे मुख्यस्थानस्य निर्वहण-कारणात् एव प्रायः इदम् उच्यते यत् सञ्चार-माध्यमानि एव अस्माकं जीवनस्वरूपं निर्धारयन्ति।



*सञ्चारमाध्यमैः विषयस्य निर्धारणकाले कुटीराणां स्थाने फैशनसप्ताहस्य समाचार-प्रकाशनस्य कः परिणामः जायते?*

*किं भवन्तः कञ्चित् तादृशं विषयं जानन्ति यः भवतां दृष्ट्या एतस्मात् कारणात् महत्त्वपूर्णः न आसीत् यतोहि सञ्चारमाध्यमैः सः न दर्शितः असीत् ?*

अद्यतने काले एव सञ्चारमाध्यमानि कोला-पेयेषु कीटनाशकानां स्तरः हानेः स्तरं यावत् वर्धितम् अस्ति इति विषये अस्माकम् अवधानम् आकर्षितम् । ते कीटनाशकाः अत्यधिक-मात्रायाम् एतेषु पेयेषु सन्ति इति समाख्यां प्रकाशितवन्तः तथा च

एवम् अस्मान् कोला-पेयानाम् अन्ताराष्ट्रिय-गुणवत्तायाः सुरक्षा-मापदण्डानाम् अनुसारं नियमितरूपेण नियन्त्रित-करणस्य आवश्यकता अनुभाविता। ते सर्वकारस्य अभिभवस्य अनन्तरम् निर्भयतया घोषणां कृतवन्तः यत् कोलापानं सुरक्षितं न अस्ति। एतादृशं वृन्तान्तं प्रस्तूय सञ्चारमाध्यमानि निश्चितरूपेण अस्माकं ध्यानम् एतादृशे विषये केन्द्रितम् कृतं तथाविधः प्रयासः च कृतः यस्मिन् यदि तेषां समाख्या न स्यात् तर्हि अस्माकं ध्यानम् अपि तत्र न गच्छेत्।

बहुधा एतादृश्यः घटनाः भवन्ति यदा सञ्चार-माध्यमानि तेषु विषयेषु अस्माकम् अवधानम् आकर्षयितुम् विफलानि भवन्ति ये अस्माकं जीवनस्य कृते महत्त्वपूर्णाः भवन्ति । उदाहरणार्थं पेयजलम् अस्माकं देशस्य काचित् महती समस्या अस्ति । प्रतिवर्षं सहस्राधिकाः जनाः कष्टानि सहन्ते अपि च म्रियन्ते यतोहि ते पातुं सुरक्षितं जलं न लभन्ते, तथापि वयम् एतस्मिन् विषये सञ्चारमाध्यमानि अल्पतया एव चर्चां कुर्वन्ति, पश्यामः। केनचित् सुविख्यातेन भारतीयपत्रकारेण लिखितं यत् कथं वस्त्र-सज्जाकाराः फैशन-सप्ताहे धनिकानां समक्षे नूतनानि वस्त्राणि प्रदर्श्य सर्वेषां समाचारपत्राणां मुखपृष्ठेषु स्थानं प्राप्तवन्तः परन्तु तस्मिन् एव सप्ताहे मुम्बई-नगरे अनेकाः कुटीराः निपातिताः परन्तु केनापि समाचारपत्रेण एतस्मिन् विषये अवधानं न कृतम्।



## स्थानीय-सञ्चार-माध्यमम्

*यत् सञ्चार-माध्यमानि तेषु लघुषु लघुषु विषयेषु रुचिं विधास्यन्ति येषां साधारणजनैः तथा च तेषां जीवनेन सह सम्बन्धः अस्ति, इदं ज्ञात्वा अनेके स्थानीयसमूहाः स्वयं स्वस्य सञ्चारमाध्यमस्य प्रारम्भं कुर्वन्ति अथवा प्रारब्धवन्तः । बहवः जनाः सामूहिक-आकाशवाण्या कृषकेभ्यः विभिन्नानां सस्यानां मूल्यानां विषये ज्ञापयन्ति तथा च तेभ्यः बीजस्य उर्वरकाणां च विषये परामर्शं यच्छन्ति । केचन अन्ये जनाः अतिन्यूनमूल्येन अपि च सरलतया उपलभ्यमानानि छायाचित्र-यन्त्राणि स्वीकृत्य तेषां प्रयोगं च कृत्वा विभिन्नानां निर्धनसमाजानां वास्तविकजीवनस्य स्थितीः आधृत्य डाक्यूमेंट्री-चलचित्रं निर्मान्ति तथा च कदाचित् तु एतेषां निर्धनजनानां कृते चलचित्र-निर्माणस्य प्रशिक्षणं यच्छन्ति तथा च छायाचित्र-यन्त्रस्य कौशलस्य च प्रशिक्षणम् अपि यच्छन्ति ।*

*अपरम् उदाहरणं खबर-लहरिया-नामकस्य कस्यचित् समाचारपत्रस्य अस्ति यत् उत्तरप्रदेशस्य चित्रकूट-जनपदस्य अष्टाभिः दलितमहिलाभिः प्रत्येकं पञ्चदश दिनेषु एकदा प्रकाश्यते । स्थानीय-बुन्देली-भाषायां लिखिते अष्टपृष्ठात्मके अस्मिन् समाचारपत्रे दलितसम्बद्धाः विषयाः, स्त्रीः प्रति हिंसा तथा च राजनैतिकभ्रष्टाचारसम्बद्धा समाख्या भवति । एतस्य समाचारपत्रस्य पाठकाः सन्ति - कृषकाः आपणिकाः पञ्चायतस्य सदस्याः विद्यालयस्य शिक्षकाः तथा च ताः महिलाः याः अधुना सद्यैव अक्षरज्ञानं कृतवत्यः सन्ति ।*




***पृथक् पृथक् पाठकानां रुचिं दृष्ट्वा मुद्रणस्य माध्यमानि अनेकप्रकारकाणां सूचनानाम् उपलब्धिं कारयन्ति।***

प्रजातन्त्रस्य नागरिकस्य रूपेण अस्माकं जीवने सञ्चार-माध्यमानि अतीव महत्त्वपूर्णं स्थानं निर्वहन्ति यतोहि सञ्चार-माध्यमैः एव वयं सर्वकारस्य कार्यैः सम्बन्धितानां तथ्यानां विषये शृणुमः सञ्चारमाध्यमानि निश्चितं कुर्वन्ति यत् केषु विषयेषु ध्यानं केन्द्रितं स्यात् तथा च अनेन प्रकारेण तानि मुख्यविषयस्य निश्चयं कुर्वन्ति। यदि कदाचित् सर्वकारः इच्छेत् तर्हि सञ्चारमाध्यमं कस्याश्चित् घटनायाः समाचारं प्रकाशनाद् वारयितुं शक्नोति। तदेव सेंसरशिप इति उच्यते। अद्यत्वे सञ्चारमाध्यमस्य व्यापारस्य च परस्परं घनिष्ठसम्बन्धस्य कारणात् प्रायः सन्तुलितायाः समाख्यायाः प्रकाशपथे आगमनं कठिनं स्यात्। एतत् दृष्टिपथे निधाय अस्माकं कृते जागरूकता महत्त्वपूर्णा अस्ति यत् समाचारेभ्यः प्राप्ता तथ्यात्मकसूचना अपि प्रायः पूर्णा न भवति तथा च एकपक्षीया भवितुं शक्नोति। अतः अस्माभिः समाचारस्य विश्लेषणस्य कृते निम्नलिखिताः प्रश्नाः प्रष्टव्याः - एतया समाख्यया अहं कीदृशीं सूचनां प्राप्तुं शक्नोमि ? कीदृशी आवश्यकसूचना न दीयते ? अयं लेखः कस्य दृष्टिकोणेन लिखितः अस्ति ? कस्य दृष्टिकोणः त्यक्तः अस्ति तथा च किमर्थम् ?

# अभ्यासः

१. *प्रजातन्त्रे सञ्चारमाध्यमानि केन प्रकारेण महत्त्वपूर्णं स्थानं निर्वहन्ति?*

२. *किं भवन्तः एतस्य रेखाचित्रस्य कृते किञ्चित् शीर्षकं दातुं शक्नुवन्ति ? एतेन रेखाचित्रेण भवन्तः सञ्चारमाध्यमस्य तथा च महाव्यापारस्य मध्ये परस्परं सम्बन्धस्य विषये किम् अवगच्छन्ति ?*

३. *भवन्तः पठितवन्तः सन्ति यत् सञ्चारमाध्यमानि केन प्रकारेण चर्चाविषयं कल्पयन्ति । एतेषां प्रजातन्त्रे कीदृशः प्रभावः आपतति ? स्वविचाराणां पक्षे उदाहरणद्वयं यच्छन्तु ।*




४ *कक्षा-परियोजनायाः रूपेण समाचारेषु किञ्चित् एकं शीर्षकं चित्वा तस्मिन् ध्यानं केन्द्रितं कुर्वन्तु तथा च अन्य-समाचारपत्रेषु तत्सम्बद्धविवरणं चिन्वन्तु । दूरदर्शन-समाचारेषु अपि एतस्मिन् विषये प्रसारितां सामग्रीं पश्यन्तु । द्वयोः समाचारपत्रयोः विवरणस्य तुलनां कृत्वा तेषु समानतायाः तथा च भिन्नतायाः समाख्यां लिखन्तु । निम्नलिखितस्य प्रश्नस्य पृच्छा अपि सहायिका भवितुं शक्नोति -*

*क) अस्मिन् लेखे का सूचना दीयते ?*

*ख) कीदृशी सूचना एतस्मिन् परित्यक्ता अस्ति ?*

*ग) अयं लेखः कस्य दृष्टिकोणेन लिखितः अस्ति ?*

*घ) कस्य दृष्टिकोणः अत्र त्यक्तः अस्ति तथा च किमर्थम् ?*

## शब्द-सङ्कलनम्

प्रकाशितः – *एतस्य तात्पर्यं समाचार-समाख्याभिः लेखैः साक्षात्कारैः विवरणादिभिः च अस्ति यानि समाचारपत्रेषु पत्रिकासु पुस्तकेषु च प्रकाश्यन्ते यस्मात् बहवः जनाः तत् पठितुं शक्नुयुः।*

सेंसरशिप इति(नियन्त्रणम्) - *एतस्य तात्पर्यं सर्वकारस्य तया शक्त्या अथवा अधिकारेण अस्ति यस्य अन्तर्गतं सर्वकारः केषाञ्चित् विवरणानां प्रकाशने अथवा प्रदर्शने प्रतिबन्धं कर्तुं शक्नोति ।*

प्रसारणम्- *एतस्मिन् पाठे एतस्य शब्दस्य प्रयोगः दूरदर्शनस्य अथवा आकाशवाण्याः कार्यक्रमाणां सम्बन्धे अभवत् ये व्यापकक्षेत्रेषु प्रेष्यन्ते ।*

सार्वजनिकविरोधः – *अत्र विशालायां सङ्ख्यायां जनाः एकत्रीभूय कस्मिंश्चित् विषये मुक्ततया स्वकीयं विरोधं प्रकटयन्ति । अयं प्रायः प्रदर्शनं कृत्वा हस्ताक्षर-अभियान-द्वारा तथा च राजमार्गान् अवरुद्ध्य क्रियते ।*